R

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जून–जुलै – २०२२**

**सत्र १ ले**

**विषयः नीतिशतक (19R415)**

**दिनांक :०२/०७/२०२२** **गुण : ६०** **वेळ : दु. २.०० ते ४.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. त्रयाणामनुवादं कुरुत।** **(१२)**

१. खल्वाटो दिवसेश्वरस्य किरणैः सन्तापिते मस्तके गच्छन्देशमनातपं द्रुतगतिस्तालस्य मूलं गतः।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः।।

२. स्वायत्तमेकान्तहितं विधात्रा विनिर्मितं छादनयज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्।।

३. राजन्दुधुक्षसि यदि क्षितिधेनुमेतां तेनाद्य वत्समिव लोकमियं पुषाण।
तस्मिंश्च सम्यगतिशं परिपोष्यमाणे नानाफलैः फलति कल्पलतेव भूमिः।।

४. भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।

५. गजभुङ्गविहङ्गमबन्धनं शशिदिवाकरयोर्ग्रहपीडनम्।
मतिमतां च समीक्ष्य दरिद्रतां विधिरहो बलवानिति मे मतिः।।

**प्र.२. त्रयाणां ससन्दर्भं स्पष्टीकरणं दत्त।** **(१५)**

१. धिग्धिग्वृधा पौरुषम्।
२. ते के न जानीमहे।
३. सत्संगतिः कथय किं न करोति पुंसाम्।
४. मूर्खस्य नास्त्यौषधम्।
५. अर्थोऽस्तु नः केवलम्।

**प्र. ३. मूर्खपद्धतिम् अथवा परोपकारपद्धतिम् अनुसृत्य माध्यमभाषया सविस्तरं लिखत।** **(१५)**

**प्र.४. सूचनानुसारं व्याकुरुत।** **(१२)**

**१. रूपाणि लिखत।**

| | | |
|---|---|---|
| श्रवणयोः | भूषितः | कैः |
| समृद्धिभिः | यस्य | तिस्र |

**२. सन्धिविग्रहं / सन्धिं कुरुत।**

| | | |
|---|---|---|
| नाभ्यर्चनीयाः | पतत्वभिजनः | ज्वर इव |
| व्याधिर्भेषजसङ्ग्रहैः | छायेव | मौनमपण्डितानाम् |

**प्र.५. रिक्तस्थानपूर्तिं कुरुत।** **(०६)**

१. भुजङ्गमपि ……… शिरसि पुष्पवद्धारयेत्।
२. ……… राजसु पूज्यते।
३. सर्वे ……… काञ्चनमाश्रयन्ति।
४. सम्पत्सु ………. चित्तं भवत्युत्पलकोमलम्।
५. छायेव ………. खलसज्जनानाम्।
६. ……… हि नृणां वृद्धौ क्षये कारणम्।

----------